## समवाये च। (१३८/२८८१)

समवायः समुदायः, [1]तस्मिंश्चार्थे करोतौ [2]सम्पर्युपेभ्यः कात् पूर्वः सुडागमो भवति। तत्र नः संस्कृतम्। तत्र नः परिष्कृतम्। तत्र न उपस्कृतम्। समुदितम् इत्यर्थः॥

## उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु। (१३९/२८८२)

सतो गुणान्तराधानमाधिक्याय वृद्धस्य वा तादवस्थ्याय समीहा प्रतियत्नः। विकृतमेव वैकृतम्। प्रज्ञादित्वादण् (५.४.३८/२१०६)। गम्यमानार्थस्य वाक्यस्य स्वरूपेणोपादानं वाक्यस्याध्याहारः। एतेष्वर्थेषु गम्यमानेषु करोतौ धातौ परतः उपात् सुट् कात् पूर्वः भवति। प्रतियत्ने तावत् – एधो दकस्योपस्कुरुते। काण्डगुणस्योपस्कुरुते। वैकृते – उपस्कृतं भुङ्क्ते। उपस्कृतं गच्छति। वाक्याध्याहारे – उपस्कृतं जल्पति। उपस्कृतमधीते। एतेषु इति किम्? उपकरोति॥

## किरतौ लवने। (१४०/२८३९)

[3]उपात् इत्येव। उपादुत्तरस्मिन् किरतौ [4]धातौ [5]लवनविषये सुट् कात् पूर्वः भवति। उपस्कारं मद्रका लुनन्ति। उपस्कारं काश्मीरका लुनन्ति। [6]विक्षिप्य लुनन्ति इत्यर्थः। णमुलत्र वक्तव्यः। लवने इति किम्? उपकिरति देवदत्तः॥

## हिंसायां प्रतेश्च। (१४१/२८४०)

किरतौ इत्येव। उपात् प्रतेश्च उत्तरस्मिन् किरतौ[7] सुट् कात् पूर्वः भवति हिंसायां विषये। उपस्कीर्णं [8]हं ते वृषल भूयात्। प्रतिस्कीर्णं हं ते वृषल भूयात्। तथा ते वृषल विक्षेपो भूयात् यथा हिंसामनुबध्नाति इत्यर्थः। [9]हिंसायाम् इति किम्? प्रतिकीर्णम्॥

## अपाच्चतुष्पाच्छकुनिष्वालेखने। (१४२/२६८८)

[10]किरतौ इत्येव। [11]अपात् उत्तरस्मिन् किरतौ[12] चतुष्पाच्छकुनिषु यदालेखनं तस्मिन् विषये सुट् कात् पूर्वः भवति। अपस्किरते वृषभो हृष्टः। अपस्किरते कुक्कुटो भक्ष्यार्थी। अपस्किरते श्वा आश्रयार्थी (म.भा. ३.९४)। आलिख्य विक्षिपति इत्यर्थः। चतुष्पाच्छकुनिषु इति किम्? अपकिरति देवदत्तः।

[६९४] हर्षजीविकाकुलायकरणेष्विति वक्तव्यम्। (म. भा. ३.९४)

---

1. एतस्मिन्नर्थे ग. फ. 2. समादिभ्यः फ, परतः इत्यधिकम् ह. 3. वाक्यमिदं नास्ति फ. 4. धातौ नास्ति फ. ह. 5. लवने फ. 6. लवनविषये विक्षेपं कुर्वन्ति इत्यर्थः ड. 7. विषये इत्यधिकम् ड. फ. ह. 8. हं नास्ति फ. 9. हिंसायाम् – प्रतिकीर्णम् नास्ति फ. 10. वाक्यमिदं नास्ति फ. 11. हिंसादौ विषये इत्यधिकम् फ. 12. च इत्यधिकम् फ.